# Rishibhih Kritam Parvati Stotram 7

# ઋષિભિઃ કૃતં પાર્વતીસ્તોત્રમ્ ૭

## Document Information

Text title : Rishibhih Kritam Parvati Stotram 7

File name : RRiShibhiHkRRitaMpArvatIstotram.itx

Category : devii, devI, tAmraparNImAhAtmya, pArvatI, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : tAmraparNImAhAtmya | adhyAya 1/23-33||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

# ઋષિભિઃ કૃતં પાર્વતીસ્તોત્રમ્ ૭

ઋષય ઊચુઃ ।
જય દેવિ મહાદેવિ મહામઙ્ગલદાયિનિ ।
પ્રસીદ સીદતાં નસ્ત્વં પરિત્રાણાય પાર્વતિ ॥ ૨૩॥

શૂલખડ્વાઙ્ગમુસલવિનિષ્પિષ્ટારિસૈનિકે ।
પ્રસીદ સીદતાં નસ્ત્વં પરિત્રાણાય પાર્વતિ ॥ ૨૪॥

ત્વયામ્બ સકલા દૈત્યાઃ ભક્ષિતા રણસઙ્કટે ।
પ્રસીદત સીદતાં નસ્ત્વં પરિત્રાણાય પાર્વતિ ॥ ૨૫॥

ત્વત્કરાગ્રલસત્શૂલદલિતા દાનવાઃ પુરા ।
રક્ષણાયૈવ લોકાનં સા કૃપા ક્વ ગતામ્બિકે ॥ ૨૬॥

સિંહનાદવિનાદેન મોહિતા દૈત્યદાનવાઃ ।
રક્ષણાયૈવ લોકાનાં સા કૃપા ક્વ ગતામ્બિકે ॥ ૨૭॥

દંષ્ટ્રાકરાલવદનં દૃષ્ટ્વા તે મૂર્ચ્છિતાઃ પરે ।
રક્ષણાયૈવ લોકાનાં સા કૃપા ક્વ ગતામ્બિકે ॥ ૨૮॥

અસ્માન્ પાહિ ભયાદ્ભીતાનનાથાન્ ભક્તવત્સલે ।
અવિલમ્બં દયાપાત્રં વિધેહિ ભુવનત્રયમ્ ॥ ૨૯॥

લીલયૈવ વિહન્ત્રિ ત્વં દૈત્યાનાં કીર્તિભઞ્જની ।
અવિલમ્બં દયાપાત્રં વિધેહિ ભુવનત્રયમ્ ॥ ૩૦॥

ત્વદસ્ત્રવિત્રસ્તબલં દૈત્યાનાં ક્ષણભઙ્ગુરમ્ ।
તાનુદસ્યાસિ દુર્ગે ત્વં ભક્તાનાં હિતકામ્યયા ॥ ૩૧॥

ત્વયા જગદિદં વિશ્વં સમયે પાલ્યતે ભયાત્ ।
તથા નઃ પાહિ કલ્યાણિ પ્રસૂઃ પુત્રાનિવ સ્વયમ્ ॥ ૩૨॥

તુભ્યં નમઃ સર્વજગત્સવિત્રી વિત્રાસ્ય પાપાનમરારિવર્ગાન્ ।

આમં જનં પાહિ ભવાનિ ભદ્રે રુદ્રાણિ ભદ્રે કરુણે પુરાણિ ॥ ૩૩॥

ઇતિ તામ્રપર્ણીમાહાત્મ્યે પઞ્ચમાધ્યાયાન્તર્ગતં
ઋષિભિઃ કૃતં પાર્વતીસ્તોત્રં સમ્પૂર્ણમ્ ।

તામ્રપર્ણીમાહાત્મ્ય । અધ્યાય ૧/૨૩-૩૩॥

tAmraparNImAhAtmya . adhyAya 1/23-33..

Proofread by PSA Easwaran

---

*Rishibhih Kritam Parvati Stotram 7*

pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*